# संस्कृत-वार्ता:

**दिनाङ्क :- 09.09.2024** **प्रातः - 06: 55**

## अथ वार्ताः

### संयुक्तारबामीरातयुवराजः भारते

संयुक्त-अरब-अमीरातस्य युवराजः शेख खालिद बिन मोहम्मद बिन जायद अल नाहयानः ह्यः भारतं सम्प्राप्तः। असौ अद्य प्रधानमन्त्रिणा नरेन्द्र-मोदिना सह मेलनं करिष्यति। अस्याः यात्रायाः उद्देश्यं संयुक्त अरब अमीरात-भारतयोः सम्बम्धेषु दृढता विद्यते। श्रीखालिदस्य सह मन्त्रिणां वरिष्ठाधिकारिणाम् उद्योगपतिनाम् आर्थिक-सहभागिनाम् च एकं प्रतिनिधिमण्डलमपि आगतम् । श्री-ख़ालिदः भारते आर्थिक-सहयोग-संवर्धनाय वरिष्ठाधिकारिभिः सह उपवेशनानि अपि करिष्यति। सः तादृशेषु कार्यक्रमेषु सहभागितां करिष्यति येषु विविध-क्षेत्रषु अमीरात-भारतयोः दृढार्थिक-सांस्कृतिक-सम्बन्धः प्रदर्शयिष्यन्ते ।

### विदेश-मन्त्री

विदेश-मन्त्री डॉ. एस.जयशंकर भारत-खाति-सहयोग-परिषदः विदेशमन्त्रिणां प्रथमोपवेशने प्रतिभागाय सऊदी अरबस्य राजधानयां रियाद नगर्यां सम्प्रातः। द्वि-दिवसीय-यात्रावधौ डॉ. जयशंकर परिषदः सदस्यदेशानां विदेशमन्त्रिभिः सह द्विपक्षीयोपवेशनानि विधास्यति।

### जीएसटी परिषद् - सभा :

वस्तु सेवा कर परिषदः चतुः पञ्चाशत्तमसभा नवदिल्ल्याम् *क्रीमरे* , अद्य भविष्यति। केन्द्रीय वित्तमन्त्री निर्मला सीतारामण अस्याः सभाया : अध्यक्षतां करिष्यति। अन्तिमा जीएसटी-परिषत्सभा अस्मिन् वर्षे जूनमासे आयोजिता यस्मिन् परिषद् सर्वेषु लौह--दुग्ध-इत्यादिशु द्वादश-प्रतिशतं-जीएसटी-इत्यस्य एकरूप-मूल्यस्य अनुशंसा कृता आसीत् परिषदा एतदपि अनुशंसितं यत् भारतीयरेलवेद्वारा सामान्यजनाय प्रदत्ताः सेवाः, यथा स्थात्रचिटीकाविक्रयणं, सेवानिवृत्तिकक्षस्य प्रतीक्षालयस्य च सौविध्यम् विद्युतकोशेन-सञ्चालितयानसेवाः च सम्मिलिताः सन्ति परञ्च एतेषु वस्तु सेवाकर इति न प्रयुज्यते ।

### एशिया-चषक हॉकी-स्पर्धा

एशिया चषक्-हॉकी स्पर्धा मालिकायाम् गतसायं भारतेन चीनदलं त्रीणि शून्यमिति अङ्कान्तरालेन पराजितम्। एषा स्पर्धा चीनदेशस्य हुलुनबुइर इत्यत्र क्रीडिता।

### भाजपा-सरकार :

केन्द्रीयमन्त्री तथा पश्चिमबङ्गस्य भाजपा अध्यक्षः सुकान्तमजुमदारः उक्तवान् यत्, टीएमसी-सांसद जवाहर सरकारस्य राज्यसभातः त्यागपत्र प्रदानस्य निर्णयः स्पष्टं सूचयति यत् बङ्गस्य चिन्तां कुर्वन्तः जनाः ममता बनर्जी इत्यस्याः असफलनेतृत्वस्य समर्थनं कर्तुं न इच्छन्ति। एकस्मिन् सामाजिक संजालीय सन्देशे डॉ. मजुमदारः आरोपितवान् यत् पश्चिमबङ्गस्य मुख्यमन्त्रिणः उपरि जनानां विश्वासः समाप्तः यः राज्यस्य भविष्यं अन्धकारे नयति।

## पैरालम्पिकसमापनसमारोहः

गतरात्रौ पेरिस्नगरे पैरालिम्पिकक्रीडायाः समापानम् अभवत्, अस्य समापनसमारोहस्य आयोजनं प्रतिष्ठितस्य स्टेड डी फ्रांस् इत्यत्र अभवत्। समापनसमारोहे विषयगतनृत्यं, गणमान्यजनानाम् भाषणं च समेत्य प्रदर्शनानां जीवन्तं मिश्रणं दृश्यते स्म। समापनसमारोहे स्वर्णपदकविजेता धनुर्धरः हरविन्दरसिंहः धावकः प्रीतिपालः च, देशस्य ध्वजवाहकौ आस्ताम्।

**।। इति वार्ताः।।**